CHUNILAL GANDHI VIDYABHAVAN
SURAT.

Manuscripts Library
S. D. P. R.

Coll. No. [illegible]

Title [illegible]

CHUNILAL GANDHI VIDYABHAVAN, SURAT

Shastri Dinmanishankar Pustak-Bhandara

No.: 900 Subject: Grammar.

Title: Praudha manorama.

Author: — Scribe: —

Date of the work: — Date of the Ms.: —

Place of the work: — Place of the Ms.: —

Size: 9.3" by 4.7" Extent: 2 Fol.

Language: Sanskrit. Script: Devanagari

Remarks: incomplete. ends abruptly

मनो० ॥१॥

श्रीगणेशायनमः॥ श्रीरामचंद्रायनमः॥ श्रीभवानीशंकराभ्यांनमः॥ ॥ध्यायंध्यायंप
रंब्रह्मस्मारंस्मारंगुरोर्गिरः॥ सिद्धांतकौमुदीव्याख्यांकुर्मःप्रौढमनोरमां॥ ॥हयवरट्॥
हकारोपदेशोअट्‌अहरहरहवाइत्यत्रअहणेषुहकारस्यग्रहणार्थः॥ अर्हेण॥ अट्‌व्यवायेपीति
णत्वं। देवाहसंति। भोभगोइतिरोर्यत्वं। देवोहसति। हसिचेत्युत्वं। लिलिहिढ्वे। लिलिहिध्वे॥
विभाषेटइतिवाढः। हल्। इदंसूत्रंवस्तुतःझल्प्रत्याहारेषुहकारस्यग्रहणार्थं। रुदिहि। स्व
पिहि। रुदादिभ्यःसार्वधातुकेइतिवलादिलक्षणइट्। स्निहित्वा। स्नेहित्वा। रलोव्युपधा
दितिवाकित्वं। अदाग्ध्वां। सलोसलि इतिसलोपः। असिक्षत्। ढासरतिक्सः। हसं
त्यां। सूत्रेंत्यमिति। हसिअंत्यमितिविग्रहेसप्तमीतियोगविभागाल्लुप्तसप्तमीतिवासमा
स इतिभावः। यद्वा। षष्ठीतत्पुरुषोयं। स्यादेतत्। हसिस्येकदेशस्यैवतंत्रावृत्त्येकशेषान्य
तममस्तु। हल्सूत्रेस्यैवेतिचव्याख्यास्यते। सामीप्यंषष्ठ्यर्थः। यद्वा। मास्तुतंत्रादि। अ
स्तुसमाहारेद्वंद्वः। हश्चलश्चेति। लकारस्यसंयोगांतस्यलोप इतिचेन्मैवं। आद्येस
मासस्यक्लिष्टत्वात्। नहिब्राह्मणकंबलइत्यादौब्राह्मणसमीपवर्त्यन्यदीयकं
बलःप्रतीयते। नवाचित्रगुशब्दाच्चित्रगवीणांसमी ॥शिव॥ ॥१॥

पवर्तीरक्षादिप्रतीयते। अतएवानंतरादिषुनसमासोऽनभिधानादितिस्पष्टमा
करे। किंबहुनाब्राह्मणस्यकंबलःचित्रागावोयस्येतिव्यस्तप्रयोगोपितत्रानिष्टः। द्विती
येपिसंयोगांतलोपोदुर्लभः। यणःप्रतिषेधारंभात्। तत्प्रत्याख्यानपक्षेपिझलोझ
लीतिसूत्रात्झल्ग्रहणमपकृष्यसंयोगांतस्यझलोलोपविधानाच्च। किंचापशब्दबो
धंविनावाक्यार्थबोधासंभवेनहल्प्रत्याहारसिद्धेःप्रागेतत्सूत्रार्थप्रसक्तेनदुरुद्धरायो
येयत्नः। अस्यांचावस्थायांहलंत्यबाधार्थप्रसिद्धोद्देश्यएवदुर्लभः। सहावविवक्षायाअसंभवा
त्। तस्माद्यथोक्तएवव्याख्यो। मध्यगानामिति। आद्यंताभ्यामवयवाभ्यामवयवीसमुदाय
आक्षिप्यते। तस्यचयुगपल्लक्ष्येप्रयोगाभावात्तदवयवेष्ववतरंती संज्ञामध्यगेषुविश्रा
म्यति। नत्वाद्यंतयोः। संज्ञास्वरूपांतर्भावितत्वात्तयोःपारार्थ्यनिर्णयादितिभावः॥
स्वस्यचेति। स्वरूपंइत्यनुवृत्तेः। स्वंरूपंचादेरेवगृह्यते। नांत्यस्य। अंत्येनेत्यप्रधान
त्ततीयानिर्देशात्। सर्वनाम्नामुत्सर्गतःप्रधानपरामर्शित्वात्॥ आद्योच्चारणमिति
यद्यप्युपदिश्यतेऽनेनेतिकरणव्युत्पत्त्याशास्त्रमुपदेशइतिभाष्यवृत्त्यादिषुव्याख्या
तंतथापितस्मिष्ठिवादमात्रे। करणेघञो दुर्लभत्वात्। ल्युटाबाधात्। नचघः। असं

मनो॰ णत्वात्। ग्राम्येण संज्ञायामिति व्याख्यानस्य क्लिष्टत्वात्। न ह्युपाधेरुपाधिर्भवतीत्यादिना
॥२॥ भाष्यकृता अवहेलनाच्च। अत एव घापवादो हलश्चेति घञपीहन। बाहुलकं त्वगतिकगतिः
अत एव प्रक्रियैतेषां व्यायामे रितिकरणव्युत्पत्तिरपि परास्ता। तथा च वार्त्तिकं। अज
र्थ्यां स्त्री खलनाः स्त्रियाः खलनौ विप्रतिषेधेनेति। अतो भावे प्रत्यय एव न्याय्य इति
भावः। यत्तु धातुसूत्रे त्यादिपु ठेति यच्च व्याचक्षते करणल्युसत्या पूर्वोद्दीपितानामुपदे
शत्वं कर्मव्युत्पत्त्या त्वागमाधीनं। उणादिलिंगानुशासनयोरपि सूत्रत्वात्सिद्धे प्रथ
गुपादानं गोबलीवर्दन्यायेन। एवं गणत्वादेव सिद्धे धातोरपीत्यादि॥ अत्रेदं वक्तव्यं। किं
एषामुपदेशसंज्ञा उत योगमात्रं। नाद्यः। संज्ञायाः शास्त्रकारैरनुक्तेः। अ संज्ञात्वाद्
प्रत्ययानेति भाष्योक्तेश्च। अस्मदादिकृतसंज्ञायाः शास्त्रे व्यवस्थापकत्वे अतिप्र
संगाच्च। आमो मित्त्वमिदंत्वादित्यादि स्वपरग्रंथविरोधाच्च। न ह्युत्तरघानुबन्धस्या
मीन प्रत्ययत्वं। येन मित्त्वं न भवेत्। किं चैवं प्रत्ययविशेषणं च स्याः प्रकल्पकत्वे सनः स
व नैर्दिशोऽस्ति त्याद्यां स्यापदेशाभावादित्संज्ञा न स्यादिति भाष्यकैयटादीनां व्याकुप्येत। शिव ॥२॥